CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library

S.D.P.B.

Coll. No. 780

Title Tripurasundarī pūjā prayoga

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 780 Subject: Tantric Rit

Title: Tripurasundarīpūjāprayoga

Author: — Scribe: —

Date of the work: — Date of the Ms.: —

Place of the work: — Place of the Ms.: —

Size: 7.4" by 4.2" Extent: 13 foll.

Language: Sanskrit Script: Devanāgarī

Remarks: —

श्रीगणेशाय नमः॥ अथ पंचाक्षर संक्षेप प्रातः कृत्यादि पूजा प्रयोगः॥ तत्र
श्रीमान्साधकवरः रजनीचतुर्थयामे विबुध्यावश्यकं कृत्वा पाणिपादनेत्रमु
खं प्रक्षाल्य रात्रिवाससस्त्यक्त्वा शुचिधौतेन्यवाससी परिधायाचम्य त्रिःप्रा
णानायम्य स्वासने समुपविश्य पंचांगादि मध्ये न्यूनतमं स्नानं विधाय व
स्त्राडीपुरःसरं देवगृहं प्रविश्य संमार्जनादिकं मंगलारात्रिकं च कृत्वा पूजा
हृतैर्निर्माल्यमपकृष्य पूर्वदिन पूजावशिष्टपुष्पादिना पुष्पांजलित्रयं द मलेन
त्वार्घ्यपाद्योक्षोदकनेत्र मुखप्रक्षालनं दंतधावनगंडूष मुखप्रक्षालना चम १

नमुच्चलौमयुग्मं च दत्वा प्रणम्याज्ञां गृहीत्वा यथोक्तासने समुपविश्य। ॐ
नमः सुदर्शनाय अस्त्राय फट् इति करशुद्धितालत्रयं दशदिग्बंधाग्निप्राका
र ३ व्यापक ३ कृत्वा। शिवाद्यशेष गुरु पारंपर्य क्रमेणाप्यावस्वगुरुपादांबुजं
तावत्प्रणमामि इति नमस्कृत्य ध्यात्वा मनसाभ्यर्च्य गुरुपादुकामंत्रं यथा
शक्ति प्रजप्य जपं समर्प्य। ऐं अखंड मंडलाकारं व्याप्तं येन चराचरं। तत्प
दं दर्शितं येन तस्मै श्रीगुरवे नमः। इति पंचमुद्राभिः प्रणम्य। ॐ नमस्ते ना
थ भगवन् शिवाय गुरुरूपिणे। विद्यावतार संसिध्यै स्वीकृतानेक विग्रह।

॥नवायनवरूपाय परमार्थैकरूपिणे॥ सर्वज्ञानतमोभेदभानवे चिद्घ
नायते॥२॥ स्वतंत्राय दयाक्लृप्तविग्रहाय शिवात्मने॥ परतंत्राय भक्तानां भव्या
नां भव्यरूपिणे॥३॥ पुरस्तात्पार्श्वयोः पृष्ठे नमस्कुर्यामुपर्यधः॥ सदा मच्चित्त
भावेन विधेहि भवदासनं॥४॥ त्वत्प्रसादादहं देव कृतकृत्योस्मि सर्वतः॥ मायामृ
त्युमहापाशाद्विमुक्तोस्मि शिवोस्मि च॥५॥ इति विज्ञाप्य श्रीगुरुं स्थितिदेशं प्र
णम्य॥ ततः प्रभृति सायांतं सायादि प्रातरंततः॥ यत्करोमि जगन्नाथ तदस्तु
तव पूजनमिति सर्वं श्रीगुरवे निवेद्य॥ ॐ उल्लिनीध्यानेन मंत्रशिखां विधाय २

षडंगं पूजयन्नित्यामंत्रैरेकैकवारं द्वितीयखंडेन दशवारं मूलविद्यादिनित्या
न्यां त्रिवारं जपित्वा॥ यथा॥ ऐं सकलह्रीं नित्यक्रीं क्लिं क्लिन्ने मदद्रवे सौः॥ कामे
श्वरि नित्या श्रीपादुकां पूजयामि॥ ऐं भगभुगे भगिनी भगोदरी भगमाले
भगावहे भगगुह्ये भगयोनि भगनिपातिनि सर्वभगवशंकरि भगरूपे
नित्यक्लिन्ने भगस्वरूपे सर्वाणि भगानि मे ह्यानय वरदे रेते सुरेते भगक्लि
न्ने क्लिन्नद्रवे क्लेदय द्रावय अमोघे भगविच्चे क्षुभ क्षोभय सर्वसत्वान्
भगेश्वरि ऐं ब्लूं जें ब्लूं हें सर्वाणि भगानि मे वशमानय स्त्रीं हर ब्लें ह्रीं भगमा
लिनि नित्या श्रीपादुका॥ ॐ ह्रीं नित्यक्लिन्ने मदद्रवे स्वाहा॥ नित्यक्लिन्ना

ह्रीं४ हसकलस्रैंरडैं५

नीत्याश्री०।ॐक्रोंभ्रोंक्रोंझ्रौंछ्रौंज्रौंस्वाहा।भेरुंडानीत्याश्री०।ॐह्रींवह्निवासि
न्यैनमः।वह्निवासिनीनीत्याश्री०।ह्रींनित्यक्लिन्नेऐंक्रोंनित्यमदद्रवेह्रींवज्रे
श्वरीनीत्याश्री०।ह्रींशिवदूत्यैनमः।शिवदूतीनीत्याश्री०।ॐह्रींहुंखेचछेक्षः
स्त्रींहुंक्षेंफट्‌त्वरितानीत्याश्री०।ऐंक्लींसौःकुलसुंदरीनीत्याश्री०।ह
सकलरडैंहसकलरडौःनित्याश्रीनित्याश्री०।ह्रींफ्रेंस्रूंक्रोंआंक्लींब्लूंनित्या
मदद्रवेहुंफ्रेंह्रींनीलपताकानीत्याश्री०।भ्म्र्यौंविजयानीत्याश्री०।सौंस
र्वमंगलानीश्री०।ॐनमोभगवतिज्वालामालिनिदेवदेविसर्वभूतसंहा
रकारिकेजातवेदसिज्वलंति।ज्वलज्वलप्रज्वलह्रींह्रींहुंररररररज्वाला ३

भ्मर्यूंॐफुं३

निहुंफट्‌स्वाहा।ज्वालामालिनिनित्याश्री०।क्रौंचित्रानित्याश्री०।स४॥१०
वारंमूलविद्यादिननित्यास्यांत्रिवारंजपित्वार्घजलेनगृहीतीयखंडमुच्चरन्नात्मा
नंभागवस्तूनिचत्रिःप्रोक्षयेत्॥ततःप्राणानायम्य॥अस्यश्रीमत्त्रिपुरसुंद
रीमंत्रस्यदक्षिणामूर्तीऋषिःपंक्तिःछंदःश्रीमहात्रिपुरसुंदरीदेवताऐंबीजं
सौःशक्तिःक्लींकीलकं।श्वेतोवर्णः।ज्ञानाग्निर्मुखं।उदात्तस्वरः।ममनिरतिश
यानंदश्रीगुरुपादुकाचनद्वारा।श्रीत्रिपुरसुंदरीप्रजनेविनियोगः॥ऐंक
पश्रीमत्त्रिपुरसुंरीसर्वज्ञशक्तिधाम्नेहृदायनमः॥क्लींहृपैदश्रीमत्त्रिपु
रसुंदरीनित्यशक्तिधाम्नेशिरसे०।सौःस४श्रीमत्त्रिपुरसुंदरीअनादि

तृमि१

बोधशक्तिधाम्ने शिखायै०॥ ऐं कप श्रीमत्त्रिपुरसुंदरी स्वतंत्रशक्तिधाम्ने
कवचं०॥ क्लीं हदु श्रीमत्त्रिपुरसुंदरी अलुप्तशक्तिधाम्ने नेत्रत्रयाय०॥
सौः सष श्रीमत्त्रिपुरसुंदरी अनंतशक्तिधाम्ने अस्त्राय०॥ २ अं आं इं ईं उं
ऊं ऋं ॠं ऌं ॡं एं ऐं ओं औं अं अः वशिनी वाग्देवतायै नमो ब्रह्मरंध्रे। २ कं पकूं
ह्रीं कामेश्वरी वा० भाले। २ चं प ब्लूं मोदिनी वा० भ्रातायां। २ टं प य्लूं विमला वा०
गले। २ तं प ज्म्रीं अरुणा वा० हृदि। पं प ह्स्ल्व्यूं जयिनी वा० नाभौ। २ यं प झ्म्र्यूं
सर्वेश्वरी वा० आधारे। २ षं प क्ष्म्रीं कौलिनी वा० पादहृदयमूलाग्रावधि
ह्रीं ऐं ह्रीं क्लीं ह्रीं सौः देव्यासनाय नमः पादयोः। २ ह्रैं ह्क्लीं ह्सौः चक्रासनाय ४

ह्क्लीं १ ह्क्लूं १

नमो जंघयोः। २ ह्रैं ह्क्लीं ह्सौः सर्वमंत्रासनाय नमो जान्वोः। २ ह्रीं ऐं क्लीं ह्रीं ह्रीं सौः
ह्रूं साध्यसिद्धासनाय नमः ऊरू आधारे। एवं पीठं संपूज्य। स्वहृदि। लोहितां ललि
तां बाणचापपाशांकुशधारिणीकरैः॥ दधानां कामराजांके यंत्रितां मुदितां स्मरेत्॥
८ शेन धौह्रस्तमारुपदक्षोर्ध्वां तं आयुधध्यानं॥ इति देवीं ध्यात्वा पुष्पाद्द
तमर्घ्यत्रिखंडया गुरूपदेशतो मूलाधाराद् हृदि आनीय। ह्स्रैं ह्स्क्लीं ह्स्रौः नमः इति
चक्रमध्यस्थयोनौ निवेश्य कामराजांकं विनास्वसदृशावरणदेवीपरिहृतां
ध्यात्वा चूनीयखंडेन आवाहनी १ स्थापनी २ संनिरोधिनी ३ अवगुंठनी ३ संनि
धानकरी ५ नमस्त्रियांमुद्राप्रदर्श्य देस्वबीजपूर्वकं मंक्षोभादि एवं मुद्रा हेति च

त्रष्टयमुद्राश्च॥ यथा॥ द्रां संक्षोभणमुद्रायै नमः॥ द्रीं द्रावणमुद्रायै नमः॥ क्लीं
आकर्षणमुद्रायै०॥ ब्लूं वशीकरणमुद्रायै०॥ सः उन्मादमुद्रायै०॥ क्रों मांकुशमु हां २
द्रायै०॥ ह्स्खें खेचरिमुद्रायै०॥ ह्सौं बीजमुद्रायै०॥ ऐं महायोनिमुद्रायै०॥ २ यां रां लां
वां सां द्रां द्रीं क्लीं ब्लूं सः सर्वजृंभनेभ्यो बाणेभ्यो नमः॥ २ थं धं सर्वमोहनाय धनु
षे नमः॥ २ ह्रीं आं सर्ववशीकरणाय पाशाय नमः॥ २ क्रों सर्वस्तंभनाय अंकु
शाय नमः॥ २ इति अस्य प्राणप्रतिष्ठामंत्रस्य ब्रह्मविष्णुमहेश्वरा ऋषयः ऋग्य
~~जुःसामभ्यो छंदोभ्यो नमो मुखे। प्राणशक्तिदेवतायै नमो हृदि। आं बीजा~~
~~य नमो गुह्ये~~ नि छंदांसि प्राणशक्तिर्देवता आं बीजं क्रों शक्तिः मम प्राणस्थाप ५

नपने विनियोगः॥ ब्रह्मविष्णुमहेश्वरा ~~ऋषयः ऋग्यजुःसामछंदांसि~~ ऋषि
भ्यो नमः शिरसि। ऋग्यजुःसामच्छंदोभ्यो नमो मुखे। प्राणशक्तिदेवतायै
नमो हृदि। आं बीजाय नमो गुह्ये। क्रों शक्तये नमः पादयोः॥ ङं कं खं घं गं आका
शवायुवह्निजलपृथिव्यात्मने अंगुष्ठाभ्यां नमः हृदयाय नमः॥ ञं चं छं झं जं
शब्दस्पर्शरूपरसगंधात्मने तर्जनीभ्यां नमः शिरसे स्वाहा॥ णं टं ठं ढं डं श्रोत्र
त्वक्चक्षुर्जिह्वाघ्राणात्मने मध्यमाभ्यां नमः शिखायै वषट्॥ नं तं थं धं दं वा
क्पाणिपादपायूपस्थात्मने नमः अनामिकाभ्यां नमः कवचाय हुं॥ मं पं फं
भं बं वक्तव्यादानगमनविसर्गानंदात्मने कनिष्ठाभ्यां नमः नेत्रत्रयाय वौ

वं १ षड्रू शांयंरंलंवंशंषंसंहंमनोबुध्यहंकारचित्तात्मने करतलपृष्ठाभ्यां न
मः अस्त्राय फट्। इति षडंगं। ऐं नमः नाभ्यादिपादांतं। ह्रीं नमः हृदयादि ना
भ्यंतं। क्लीं नमः शिर आदिहृदंतं। यं त्वगात्मने नमः। रं असृगात्मने नमः। लं गा ३
मांसात्मने नमः। वं मेद आत्मने नमः। शं अस्थ्यात्मने नमः। षं मज्जात्मने नमः।
सं शुक्रात्मने नमः। हौं उं जसो आत्मने। हं प्राणात्मने नमः। सः जीवात्मने नमः
। इति हृदये विन्यस्य मंत्रेण व्यापकं कृत्वा ध्यायेत्। रक्तांभोधिस्थपोतोल्लस
दरुणसरोजाधिरूढा कराब्जैः पाशं कोदंडमिक्षूद्भवमथ गुणमप्यंकुशं पंच
बाणान्॥ बिभ्राणासृक्कपालं त्रिनयनलसिता पीनवक्षोरुहाढ्या देवी बा ६

ह्रीं उं हंसः २

लार्कवर्णा भवतु सुखकरी प्राणशक्तिः परा नः॥ इति ध्यात्वा। हृदि हस्तं निधा
य मनसा देवीं संपूज्य। आं ह्रीं क्रों यंरंलंवंशंषंसंहौं उं हंसं हंसः त्रिपुरसुंदर्याः
प्राणा इह प्राणाः। आं ह्रीं क्रों यंरंलंवंशंषंसंहौं उं हंसं हंसः त्रिपुरसुंदर्याः जी ह्रीं उं हंसः ३
व इह स्थितः। आं ह्रीं क्रों यंरंलंवंशंषंसंहौं उं हंसं हंसः त्रिपुरसुंदर्याः सर्वेंद्रि ह्रीं उं हंसः ४
याणि॥ आं ह्रीं २० त्रिपुरसुंदर्याः वाङ्मनश्चक्षुःश्रोत्रघ्राणप्राणा इहैवागत्य
चिरं सुखं तिष्ठंतु स्वाहा। हौं उं हंसं हंसः ह्रीं उं इत्येको मंत्रः। एवं त्रिवारं पठित्वा षो
डशप्रणवान् जपेत्॥ २स८ दिन नित्या त्रिपुरसुंदर्याः पाद्यं तैत्रकल्पयामि न
मः। २स४त द्दिननित्या अर्घं नेस्वाहा। २स४त द्दिननित्या आचमनं। २स४त

दिननित्यास्नानं०।२ स ४ तद्दिननित्यावस्त्रं०।२ स ४ तद्दिननित्या आभरणं०। नि०।
२ स ४ तद्दिननित्यागंधं०।२ स ४ तद्दिननित्यापुष्पाणि०।२ ऐं मूलेन देवीं त्रिः संप्र
ज्य आवृतीं पूजयेत्। देवीपृष्टभागे ह्रीं श्रीं प्रकाशानंद शक्तिपादुकां पूजयामि।२
विमर्शानंद०।२ आनंदानंद०।२ दिव्याः।२ श्रीज्ञानानंद०।२ श्रीसत्यानंद०।२
श्रीपूर्णानंद०।२ सिद्धाः।२ स्वभावानंद०।२ प्रतिभानंद०।२ मानुषौघाः।२ निजगुरवः।२ २५
गुरुः।२ परमगुरुः।२ परापरगुरुः।२ परमेष्ठिगुरुः।२ ततो देवीं मूलेन पंचदशनित्याः
त्या पूजयेत्। ततः पश्चिमपूर्वद्वारदक्षशाखयोः।२ अणिमादिसिद्धि०।२ लघिमा०।२
वैष्वीशाग्निनिरृतिकोणेषु।२ महिमा०।२ ईशित्वा०।२ वशित्व०।२ सर्वकाम्य०। दक्षि ७

णोत्तरद्वारयोः।२ भुक्ति०।२ इच्छा०।२ पश्चिमपूर्वद्वारवामशाखयोः।२ रससि०।२
सर्वकामा०।२ ओं ह्रीं पादुकां०। पश्चिमे।२ माहेश्वरी०।२ पूर्वे। वाह्येग्न्यादिकोणेषु।२
मी। कौमारी०।२ वैष्णवी०।२ वाराही०।२ इंद्राणी०। दक्षद्वारे।२ चामुंडा०। उत्तरद्वा
रे महालक्ष्मी०। मूलं त्रिपुरानित्यापादुकां पूजयामीति मध्ये पुष्पांजलिं दत्वा। ह्रीं
श्रीं एताः प्रकटयोगिन्यस्त्रैलोक्यमोहने चक्रे पूजितां ग्लूं ३। इति पुष्पांजलिदा
नेन पूजां समर्पयेत्। इति संक्षोभमुद्रां दर्शयेत्॥ ॥१॥ ॥ततः षोडशदले देव्यग्र
दलमारभ्य अप्रादक्षिण्येन।२ अं कामाकर्षिणी नित्याकलापादुकां पूजया
मि।२ आं बुद्ध्या०।२ इं अहंकारा०।२ ईं शब्दा०।२ उं स्पर्शा०।२ ऊं रूपा०।२ ऋं रसा०।२

ऌं गंधा०२ ॡं चित्रा०२ ॡं धैर्या०२ ऐं स्मृत्या०२ ऐं नामा०२ ईं बीजा०२ औं आ
त्मा०२ अं अमृता०२ अः शरीराकर्षिणी० मूलं० पुरेश्वरी नित्या० मध्ये०२ एता गुप्त
योन्यः सर्वाशापूरके चक्रे० ह्रीं ह्रां वर्णां दर्शयेत्॥ ॥२॥ ॥तदंतरष्टपत्रे पूर्वादि
दिक्षु वाय्वादि विदिक्षु च०२ अनंगकुसुमा पा०२ अनंगमेखला०२ अनंगम
दना०२ अनंगमदनातुरा०२ अनंगरेखा०२ अनंगवेगिनी०२ अनंगांकुशा०२
अनंगमालिनी० मध्ये मूलं० त्रिपुरसुंदरी नित्या०२ एता गुप्ततरयोगिन्यः स
र्वसंक्षोभण चक्रे० क्लीं आकर्षिणीं दर्शयेत्॥ ॥३॥ ॥ततश्चतुर्दशारे
देव्यग्रकोणमारभ्य सर्वसंक्षोभण शक्तिपादुकां पू०२ सर्वविद्राविणी०२

सर्वसंक्षोभिनी०२

सर्वाकर्षिणी०२ सर्वाह्लादिनी०२ सर्वसंमोहनी०२ सर्वस्तंभिनी०२ सर्ववशंकरी०२
सर्वरंजिनी०२ सर्वोन्मादिनी०२ सर्वार्थसाधिनी०२ सर्वसंपत्तिपूरणी०२ स
र्वमंत्रमयी०२ सर्वद्वंद्वक्षयंकरी०२ मध्ये मूलेन त्रिपुरवासिनी नित्यां पूजय२ ए
ताः संप्रदाययोगिन्यः सर्वसौभाग्यदायके चक्रे० ह्रूं आवेशिनी मुद्रां दर्शयेत्
॥ ॥४॥ ॥तदंतर्दशारे अनोः प्रदक्षिणं॥ सर्वसिद्धिप्रदा देवी पा०२ सर्वसंप
त्प्रदा०२ सर्वप्रियंकरी०२ सर्वमंगलकारिणी०२ सर्वकामप्रदा०२ सर्वदुःखवि
मोचनी०२ सर्वमृत्युप्रशमनी०२ सर्वविघ्ननिवारिणी०२ सर्वांगसुंदरी०२ स
र्वसौभाग्यदायिनी०२ मूलं त्रिपुराश्री नित्या०२ एताः कुलकौलयोगिन्यः सर्वा

र्थसाधके चक्रे ।२ सः उन्मादिनी मुद्रां ।।५।। ।।तदंतर्दशारे दक्षकोणमारभ्य २
स्वं सर्वज्ञा देवी पा ।२ सर्वशक्ति ।२ सर्वैश्वर्यप्रदा ।२ सर्वज्ञानमयी ।२ सर्वव्याधि
विनाशिनी ।२ सर्वाधारस्वरूपा ।२ सर्वपापहरा ।२ सर्वानंदमयी ।२ सर्वरक्षा
स्वरूपिणी ।२ सर्वेप्सितफलप्रदा ।२ मूलं त्रिपुरमालिनी नित्या ।२ एतानिग
र्भयोगिन्यः सर्वरोगहरे चक्रे ।२ क्रोंम हांकुशामुद्रां दर्शयेत् ।।८।। ।।तदंतरष्टा
रे दक्षकोणमारभ्य २ अं १६ रब्लूं वशिनी वाग्देवता पादुकां पू ।२ कं ५ कल्ह्रीं का
मेश्वरी ।२ चं ५ न्ब्लीं मोदिनी ।२ टं ५ य्लूं विमला ।२ तं ५ ज्म्रीं अरुणा ।२ पं ५ हस्ल्व्यूं
वा१ जयिनी ।२ यं ५ क्ष्म्र्यूं सर्वेश्वरी ।२ शं ५ क्ष्म्रीं कौलिनी ।२ मूलेन मध्ये त्रिपुरासि ९

द्धा नित्या ।२ एता रहस्ययोगिन्यः सर्वरक्षाकरे चक्रे ।२ ह्स्ख्फ्रें खेचरीमुद्रां दर्शये
त् ।।९।। ।।ततो मध्यत्रिकोणबाह्ये वायव्यादीशांतं यां रां लां वां सां द्रां द्रीं क्लीं ब्लूं
सः सर्वजृंभनेभ्यो बाणेभ्यो नमः ।२ थं धं सर्वमोहनाय धनुषे नमः ।२ ह्रीं आं सर्व
वशीकरणाय पाशाय नमः ।२ क्रों सर्वस्तंभनाय अंकुशाय नमः ।२ त्रिकोणा
ग्रकोणे २६१ क्रूं टं कामरूपपीठे कामेश्वरी देवी पू ।२ दक्षिणे २६२ क्रूं टं पूर्ण
गिरिपीठे वज्रेश्वरी देवी ।२ उत्तरे २६३ क्रूं टं जालंधरपीठे श्रीमहात्रिपुरसुं
दरी देवी श्रीपादुकां पूजयामि ।२ भगमालिनि देवी ।२ मूलं त्रिपुराम्बा नित्या ।२ म
ध्ये ।२ एताः परापररहस्ययोगिन्यः सर्वसिद्धिप्रदे चक्रे ।२ ह्सौः बीजमुद्रां प्रदर्शये

म

वा॥८॥ ॥२मूलं उड्याणपीठे श्रीमहात्रिपुरसुंदरीदेवी श्रीपादुकां पूजयामि।
पुनर्मूलं श्रीमहात्रिपुरसुंदरीनित्या श्रीपा०२ एता अतिरहस्ययोगिन्यः सर्वा
नंदमये महाचक्रे महापूजाफलं ददतु। ऐं महायोनिमुद्रां प्रदर्श्य सर्वक्षित्रयो
दशमुद्रा दर्शयेदिति॥ ॥९॥ ॥इह धूपाद्युपचारानंतरं तुरीयदिननित्यास्थाने विधा
य आत्मानं कामकलारूपं ध्यात्वा मूलं दशवारं जपेत्॥ ततः स्वात्मनि १६ नि
त्याः स्वप्यपंचभूतविद्यानिरात्मात्मा स्वरेण पूजयेत्॥ अं आं ऐं कं चं टं पं यं षं प्राण तं३
शक्तिपादुकां० इं ईं ऐं खं छं ठं थं फं रं क्षं अग्निशक्ति० उं ऊं ओं गं जं डं दं बं लं लं इला
शक्ति० ऋं ॠं औं घं झं ढं धं भं वं सं अंबुशक्ति० लृं लॄं अं ङं ञं णं नं मं शं हं खशक्ति० १०

ॐ ह्रीं हंसः सोहं स्वाहा। इति। ततो देवीरूपमात्मानं भावयन् यथाशक्ति तं ज
पं देव्यै दत्वा पुष्पांजलिं समर्प्य होमं कुर्यात्॥ प्राणनायस्याग्रे दिव्यकेन कुडं वा
स्थंडिलं शोध्य पकौ शैः प्रागग्रोदगग्रे रेखाचतुष्टयं लिखनेन तन्मध्ये नवको
ष्ठं विलिख्याग्निमानीय क्रव्यादांशं त्यक्त्वा उर्खं तदिननित्यास्थाने मध्यको
ष्ठेग्निं निधाय तास्यामेव प्रज्ज्वाल्य तास्यामग्निं परिषिंच्य दर्भैः परिस्तीर्य वि
ह्निं देवीरूपं ध्यात्वा पूज्य वह्नेः सप्तजिह्वाः हिरण्याकनकारक्ता उ८ रमा ४ सु
प्रभा ५ अतिरिक्ता ६ बहुरूपा ७ निधाः स्मृत्वा तत्र ह्रीं जिह्वास्मरणपूर्वकं प्रतिजि
ह्वं अखंड दिननित्यास्थाने वाहुतीर्हुत्वा पूजाक्रमेणावरणदेवताभ्य एकैकामा ११

हुतिं दत्वा ततो मूलविद्यया ३६ आहुती हुत्वा १८ वारं मूलं जप्त्वा ततोऽर्घोदकेना
षा२ भिषिंच्य देवीं स्वहृन्मध्यस्थज्योतिषि एकीकृत्य तां विन्यस्य तस्मिन्नातिलकं संस्थ
र्प्य परिस्तरणादर्घ्यं क्षिपेदिति होमः॥ अथ बलिः॥ ततो देव्यग्रे साधारणपा
त्रे त्रयेन्नव्यंजनपुष्पांबुफलैस्तैरुके ऊंह्रां विद्यात्रयेण तस्यै बलिः पूर्वोक्तमुद्र
यादेयः॥ विद्यात्रयं तु॥ ऐं ऊं रुं ऊं ह्रें स्वाहेति सप्ताक्षरैका॥ ऊं रुं ऊं ह्रें त्रया:॥ ह्रीं ऊं
रुं ऊं ह्रें ह्रीं स्वाहेति त्रयोदशाक्षरी अपराकृतीया पूर्वोक्ता ततश्चक्रस्थां देवीं
मभ्यर्च्य दत्तावित्तो एवं प्रसादलब्ध्वा सारूप्यवान्नमस्क्रियां नत्वा पूर्वोक्तमहा
त्रिपुरमुद्रानुसंधानेन पूर्वोक्तखेचरीमुद्रया सतन्मंत्रया शक्तिं हृदमात्मनि ११

पुरश्चा

नियोजयेत्॥ ततः प्राणायामपुरःसरं न्यासत्रयं कृत्वा पूर्वोक्तनाथपंचकं स्तोक
स्तोत्रं जपित्वा द्वादशश्लोकं जपेत्॥ गणेशग्रहनक्षत्रयोगिनीराशिरूपिणीं
॥ देवीं मंत्रमयीं नौमि मातृकां पीठरूपिणीं॥१॥ प्रणमामि महादेवीं मातृ
कां परमेश्वरीं॥ कालहृल्लोहलोल्लोहकलनाशनकारिणीं॥२॥ यदक्ष
रैकमात्रेपि संसिद्धे स्पर्द्धते नरः॥ रवितार्क्ष्येंदुकंदर्पशंकरानलविष्णुभिः
पु३ ॥३॥ यदक्षरशशिज्योत्स्नामंडितं भुवनत्रयं॥ वंदे सर्वेश्वरीं देवीं महाश्रीसि
द्धमातृकां॥४॥ यदक्षरमहासूत्रे प्रोतमेतज्जगत्त्रयं॥ ब्रह्मांडादिकटाहांतं तां
वंदे सिद्धमातृकां॥५॥ यदेकादशमाधारं बीजं कोणत्रयोद्भवं॥ ब्रह्मांडादि

कयाहांतं जगदेषापि दृश्यते ॥६॥ अकचादिटतोन्नद्धपयशाक्षरवर्गिणीं
ज्येष्ठांगबाहुहृत्पृष्ठकटिपादनिवेशिनीं ॥७॥ तामिकाराक्षरोद्धारां सारात्सा
रांपरात्परां ॥ प्रणमामि महादेवीं परमानंदरूपिणीं ॥८॥ अद्यापि यस्या जा
नंति न मनागपि देवताः ॥ केयं कस्मात्क्व केनेति स्वरूपां रूपभावनां ॥९॥ वं
देतामहमक्षय्यक्षकाराक्षररूपिणीं ॥ देवीं कुलकुलोल्लोलप्रोल्लसंतीं परां त्रि
शिवां ॥१०॥ वर्गानुक्रमयोगेन यस्यां मात्राष्टकं स्थितं ॥ वंदे तामष्टवर्गोत्थ
महासिद्ध्यष्टकेश्वरीं ॥११॥ कामपूर्णजकाराख्यश्रीपीठांतर्निवासिनीं ॥ चतु
राज्ञाकोशभूतां नौमि श्रीत्रिपुरामहं ॥१२॥ इति द्वादशभिः श्लोकैः स्तवनं सर्व १२

का२

सिद्धिकृत् ॥ देव्यास्त्वखंडरूपायास्तवनं तवमैयघतः ॥१३॥ इति स्तुत्वा दे
व्यात्मा विचरेत्सुखमिति शिवं ॥ अबुद्धिपूर्वं विहिते निषिद्धे कर्मदुतं ॥ विद्यां
जपेच्छतं तेन तत्पापान्मुच्यते ध्रुवं ॥ नित्यातिक्रमदोषाणां शांत्यै विद्याशतं
जपेत् ॥ नैमित्तिकातिक्रमणे सहस्रं प्रजपेत्सदा ॥ स्वतंत्रतंत्रानुसारोयं प्र
जकेभ्यो नमः ॥ ॥श्रीः॥ ॥हरिपुरंदरब्रह्मतिदेवतानमतसंततं नमतसंत
तं त्रिपुरसुंदरीचरणपंकजं ॥ ॥छ॥ ॥गुरुभ्यो नमः ॥ ॥परमगुरुभ्यो
नमः ॥ ॥परापरगुरुभ्यो नमः ॥ ॥परमेष्ठिगुरुभ्यो नमः ॥ ॥श्रीः॥ ॥
शुभमस्तु पाठकस्य ॥ श्रीमन्महात्रिपुरसुंदरीप्रसादोस्तु ॥ शिवमस्तु